दिनाङ्क :- 02.12.2025

प्रात: - 06:55

## प्रधानमन्त्रिणा- श्रीलङ्कादेशस्य

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः श्रीलङ्कादेशस्य राष्ट्रपतिना अनुरा कुमार दिसानायके इत्यनेन सह दूरभाषमाध्यमेन वार्तालापो विहितः , सममेव वर्तमानस्य आपरेशन सागर बन्धु इत्यस्य अन्तर्गतं श्रीलङ्कादेशस्य पीडितानां जनानाम् उद्धारार्थं, उपशमनार्थं च भारतस्य निरन्तरं समर्थनं भवति इति आश्वास्यत्। वार्तालापावसरे राष्ट्रपतिः दिसानायके इत्येषः अपि आपदायाः परिप्रेक्ष्ये भारतस्य साहाय्यार्थं गभीरं कार्तज्ञभावं अप्रकटयत्, तथा च उद्धार-दलानां, साहाय्यसामग्रीनां च द्रुतनियोजनस्य प्रशंसाम् अकरोत्।

## सञ्चार साथी

चलदूरभाषाया: प्रामाणिकतां सत्यापयितुं चल दूरभाषायां सञ्चार साथी तंत्रांशस्य पूर्वस्थापनार्थं सर्वकारेण निर्देशाः प्रदत्ताः। दूरसञ्चार-विभागेन मोबैल्-ह्यांड्सेट्-निर्मातृभ्यः आयातकेभ्यः च निर्देशः दत्तः यत् भारते उपयोगाय निर्मितासु सर्वेषु दूरभाषासु सञ्चार-साथी इति तंत्रांश: पूर्वमेव स्थापितं भवेत् इति सुनिश्चितं कर्तव्यम्।

## लोकसभा-स्थगित

विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च निर्वाचक-भूमिकायां विशेष-गहन-संशोधनम् (एस्. आई. आर्.) इत्यादीनां विषयेषु विपक्षस्य कोलाहलानन्तरं ह्य: लोकसभायाः कार्यं दिवस-पर्यन्ताय स्थगितम्। द्वितीय-स्थगनस्य अनन्तरं अपराह्ण द्वि वादने यदा लोकसभायाः आरम्भः अभवत्, तदा केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः पञ्चविंशत्यधिक-द्विसहस्रेत्यस्य मणिपुर-वस्तु-सेवा-करं (द्वितीयं संशोधनम्) विधेयकं, चर्चायै, अंगीकाराय च प्रस्तुतवती। तदा विपक्षस्य कोलाहलस्य मध्ये ध्वनिमतेन विधेयकं स्वीकृतम्। कोलाहल पूर्णे वातावरणे वित्तमन्त्री निर्मला सीतारामनः तम्बाकू तथा तत्सम्बद्धेषु उत्पादेषु उत्पादशुल्कं वर्धयितुं केन्द्रीय-उत्पादशुल्कं (संशोधनम्) विधेयकम् विंशति पञ्चविंशति प्रस्थापयत्। विपक्षस्य विरोधस्य मध्ये, पीठासीन-अधिकारी विरोध प्रदर्शन-रतेभ्य: सदस्येभ्य: सभायाः कार्याचरणाय अनुमतेः आग्रहं कृतवान्। अनवरत कोलाहलानन्तरं सभा पुन: स्थगिता।

## केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः अपि च उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथ: च संयुक्तरूपेण वाराणस्यां काशी-तमिळ्-सङ्गमम् इत्यस्य चतुर्थ-संस्करणस्य उद्घाटनम् विधास्यत:। अयं कार्यक्रमः काशी-तमिल्नाडु-राज्ययोः मध्ये अतिप्राचीनसम्बन्धाणां

नवीनीकृतं उत्सवं निर्दिशति, येन गहनः प्रवाहः, तीर्थयात्रा, कलात्मक-शैक्षणिक-आदानप्रदानम् च प्रवर्धते। मन्त्रालयेण प्रख्यापितम् यत् सङ्गमम् उत्तरभारतस्य दक्षिणभारतस्य च मध्ये सेतुरूपेण कार्यं करिष्यति इति।

देहली-कार-विस्फोटन-प्रकरणस्य

राष्ट्रिय-अन्वेषण-संस्था देहली- कार - विस्फोटन- प्रकरणस्य अन्वेषणस्य भागरूपेण जम्मू-कश्मीर-उत्तरप्रदेशयोः अनेकेषु स्थानेषु अन्वेषणम् अकरोत्। जम्मू-कश्मीर-राज्यस्य शोपियान्, कुल्गाम्, पुल्वामा, अवन्तिपोरा इत्येतेषु मण्डलेषु आहत्य अष्टस्थानेषु, लखनऊनगरस्य एकस्मिन् स्थाने च अन्वेषणम् अभवत् इति एन्.आई ए.-संस्थया एकस्मिन् वक्तव्ये सूचितम्।

अटल-पेन्शन-योजना

अटल-पेन्शन-योजना इत्यस्मिन् अष्ट दशांशः त्रिणी चत्वारिकोट्यधिक नामाङ्कनं पारितम्। वित्तमन्त्री निर्मला सीतारामनः ह्यः लोकसभायां एकस्मिन् प्रश्नस्य प्रत्युत्तरे उक्तवती। महिलानां योगदानं कुलग्राहकेषु अष्ट चत्वारिंशत्

प्रतिशतं भवति, यत् सम्पूर्णे देशे महिला-लाभार्थीनां महत्त्वपूर्णां सहभागितां प्रतिबिम्बयति। पंचविशत्यधिक द्विसहस्रतमे वर्षे आरब्धा इयं योजना नागरिकाणां कृते, विशेषतः असंघटितक्षेत्रस्य कर्मचारिणां कृते सार्वत्रिक-सामाजिक-सुरक्षा-व्यवस्थायाः निर्माणं करोति।